**International Journal of Academic Research and Development**
**ISSN: 2455-4197, Impact Factor: RJIF 5.22**
**www.academicsjournal.com**
**Volume 1; Issue 4; April 2016; Page No. 68-68**

# भाषा विज्ञानस्य इतिहासः

**शशिकान्त पाण्डेय**
Veer Kunwar Singh University, Arrah, Bihar, India

### भाषा विज्ञाननाम अथवा तस्येतिहास

प्रारम्भिक समये व्याकरणम् तथा भाषाविज्ञानं मूलतः एकमेव अस्ति इति मन्यते स्म। भाषाविज्ञाने यदि काचित् विशेषता आसीत् वर्हि तस्य तुलनात्मकत्वं। एतस्मात् कारणादेव भाषा विज्ञानं (comparative grammer) इत्युच्यते। किनतु भाषा विज्ञान केवलं तुलनात्मकं व्याकरणमेव नास्ति इति ज्ञात्वा व्यक्तमिदं नाम।[1] एकोनविंशतितमेशतके भाषातुलनायाम् अत्र पर्याप्तं बलं दीयते स्म। इत्याधारीकृत्य विद्वद्भिः (कम्परेटिव फिलोलॉसी) इति तन्नायोक्तं। नामेदं अपि कतिथित् दिवसानि अचलत, पúाादेतस्यापि त्यागोऽभवत्। अत्र सर्वाधिक व्यवधानं "तुलनात्मक" इति शब्दे आसीत्। कारणं शास्त्रीय ज्ञानं प्रायः सर्वदैव तुलनात्मकं भवति। अतः नामेदमपि व्यर्थमेवासीत्। 1817 तये वर्षे डेवीजेन भाषाविज्ञानस्यार्थे (ग्लोसॉलोजी) इति शब्द प्रयोगः कृतः। तत् शतकस्य प्रथमत्रिचरणे भाशाविज्ञानार्थे कैfiात प्रतस्य पुनः प्रयोगः कृतः। किन्तु पúाात् एतस्यापिनामस्य त्यागोऽभवत्। अनेन प्रकारेणैव प्रिचर्ड महोदयेन 1841 तमेवर्षे– Glottology इति शब्दस्य प्रयोगः कृतः किन्तु पश्चात् मैक्समूलरेण भिन्ने अर्थे शब्दस्येतस्थ प्रयोगः कृतः। विंशति तमशतकस्यारम्भे "टकरेण" सवेर्षां नामानां विचारः कृत्वा नामेदं सर्वोत्तममित्युक्तम्। किन्तु एवम् सत्यपि केनचिदपि एतस्मै नाम्ने गौरवं न प्रदत्तं। कतिचित् देशेषु एतस्यकृते फिलोलॉजी इति नाम प्रचलितमासीत्। भारतम् तथा अन्य केषुचित् देशेषु इदं नाम इदानीमपि प्रचलितः अस्ति। फिलॉलोजी मूलतः यूनानभाषायाः शब्दोऽस्ति। एतस्य अर्थः भवति प्रेम अथवा प्रेमिनः शब्दः अथवा भाषा।

आंग्ल Philology शब्दस्य प्रयोगः 1386 तये वर्षे अभवत्। तदा एतस्य अर्थः आसीत्– व्याकरणालोचना, साहित्यम् तथा ज्ञानस्य प्रेम। भाषाविज्ञानस्य कृते आङल भाषायाम् एतस्य शब्दस्य प्रथम प्रयोगः अष्टादश शतकस्य द्वितीय दशके अभवत्। आङलभाषायां एतस्यकृते Scince of Language शब्दः सुयोग्यः वर्तते, किन्तु अक्षराधिकाणां कारणेन नाम इव न भाति। अद्य उतस्यकृते प्रचलितः तथा कदाचित् सुष्ठु नाम अस्ति "लिंग्विस्टिक"। एतस्य आधारः लैटिनशब्दः Lingua (जिह्या) अस्ति।

मूलतः भाषा विज्ञानस्य अर्थे शब्दोऽयं फ्रांस देशे प्राचलत। ततः एकोनविंशति तय शतकस्य चतुर्थ दशके आंग्ल भाषायां आयं गृहीतः। फ्रांस आंग्ले "Linguistic इति रुपेण ग्रस्तिः। तथा प्रायः दशकद्वय पर्यान्तं अयमेव रुपः प्राचलत। षष्ठदशकतः एतस्यरुपं Linguistics इत्यभवत्। ततः एव एतत् इदानीमपि प्रचलति।

भाषा विज्ञानम् विश्वस्य प्रायः सार्वाषां अपि भाषाणां अध्ययनं करोति। किन्तु पाणिनीय शिक्षा केवलं वैदिक तथा लौकिक संस्कृतयोः उच्चारण मात्रस्य अध्ययनं करोति। पाणिनीय शिक्षानुसारं (63 अथवा 64 (त्रिवृष्टिः अथवा चतुष्पष्टिः) वर्णाः सन्ति तथा भाषा विज्ञानेस्यानुसारं वैदिक संस्कृते 52 (द्वप×चाशंत) तथा लौकिक संस्कृ ते (अष्टचत्वारिंशत) ध्वनयः सन्ति।

पाणिनीय शिक्षानुसारं स्वराः एकविंशतिः प×चविंशतिः स्पर्शाः यकारादयः (अतस्थाः तथा अटमाः) अष्टौ, चत्वारः यमाः एकोऽनुस्वारः एकश्चविसर्गः है। जिह्यामूलोपध्मानीयौ, दुस्पृष्टतां प्राप्तः एकः प्लुत लृकारः। इत्थं त्रिषष्टिः वर्णाः निरुपिताः अनुस्वारस्य मत भेदेन हस्वानुस्वार वादीर्घानुसारः इत्थं स्वीकारे चतुष्षष्टिः वर्णाः भवन्ति।

जीवात्मा बुद्धया विषयान् सम्यगवबोध्य तान् व्यक्तीकरणार्थं मनं कार्ये प्रयुक्ते। मनः शरीरस्य अग्निं चालयितुं प्रेरयति। तथा शरीरस्याम्निः मुख–विवरकोष्ठे वर्तमानं वायुं प्रेरयति। अनेन प्रकारेण प्रेरितः वायुः वक्षः स्थलस्य अन्तः भूत्वा प्रातः सवने प्रयोज्यं तथा गायत्री छन्दसः विशेषतया सम्बद्ध मन्द स्वं जनयति। सः एव वायुः कष्ठदेशतः गत्वा माध्यदिन सवने प्रयोज्य त्रिष्टुप्ट छन्दसः विशेषतया सम्बद्ध मध्यमस्वरं उत्पन्नं करोति। तथा शिरसि गत्वा शिरसि अभिव्यक्तः तृतीय सवने प्रयोज्यः तथा जगती छन्दसः विशेषतया सम्बद्धं तारस्वरं जनयति। अनेन प्रकारेण उपरि गत्वा शिरसि अवरोधितः भूत्वा प्राणवायुः मुखमागत्य अकारादि वर्णाणां उत्पत्तिः करोति।

तेषां वर्णानां उदात्तादि स्वराः हस्वदीर्घादि काल, कण्ठ, मूर्ध, ताल्वादि स्थान आभ्यान्तर प्रयत्नः तथा बाह्य प्रयत्नः इत्थं प×च प्रकारकः विभागः भवति।

### सन्दर्भ ग्रन्थ

1. भाषाविज्ञान एवं भाषाशास्त्र, पृ0 10 कपिल देव द्विवेदी, वि0प्र0 सं0– 2012